http://www.a2zSubjects.com

# MP BOARD CLASS 10 PAPER 2015

## संस्कृत (सामान्य) : कक्षा X

समय : घण्टात्रयम् ] [ पूर्णांक : १००

प्रश्न १. उचितविकल्पं चित्वा लिखत– १ × ५ = ५

(क) विसर्गसन्धिः अस्ति–

(अ) भानूदयः (ब) तल्लीनः

(स) मनोहरः (द) रमेशः।

(ख) "वागीशः" इत्यस्मिन् पदे सन्धिः अस्ति–

(अ) वृद्धिसन्धिः (ब) व्यंजनसन्धिः

(स) विसर्गसन्धिः (द) दीर्घसन्धिः।

(ग) "महा + औषधिः" इत्यस्य सन्धिः अस्ति–

(अ) महोषधिः (ब) महौषधिः

(स) महेषधिः (द) महाऔषधिः।

(घ) "हरेऽव" इत्यस्य सन्धिविग्रहः अस्ति–

(अ) हरे + अव (ब) हरे + एव

(स) हरि + एव (द) हरि + अव।

(ङ) अधोलिखितेषु अव्ययं नास्ति–

(अ) प्रातः (ब) यथा

(स) तथा (द) अस्तु।

उत्तर–(क) (स), (ख) (ब), (ग) (ब), (घ) (अ), (ङ) (स)।

प्रश्न २. (क) "चन्द्रशेखरः" इत्यस्मिन् पदे समासः अस्ति– १ × ५ = ५

(अ) द्वन्द्वसमासः (ब) द्विगुसमासः

(स) बहुव्रीहिसमासः (द) कर्मधारयसमासः।

(ख) "पितरौ" इत्यस्य समासविग्रहः भवति–

(अ) माता पिता (ब) माता च पिता

(स) माता पिता च (द) माता च पिता च।

(ग) तत्पुरुषसमासस्य उदाहरणम् अस्ति–

(अ) प्रतिदिनम् (ब) दीनदानम्

(स) नीलोत्पलम् (द) पीताम्बरः।

(घ) "अधिकारः" अस्मिन् पदे उपसर्गः अस्ति–

(अ) अपि (ब) अति

(स) अभि (द) अधि।

(ङ) अधोलिखितेषु उपसर्गः अस्ति–

http://www.a2zSubjects.com

(अ) यत्र (ब) तत्र

(स) कुतः (द) अनु।

उत्तर–(क) (स), (ख) (द), (ग) (ब), (घ) (द), (ङ) (द)।

प्रश्न ३. (क) "द्रक्ष्यति" अस्मिन् पदे धातुः अस्ति– १ × ५ = ५

(अ) दृश् (ब) द्रक्ष्

(स) दा (द) रक्ष्।

(ख) "गमिष्यति" इत्यस्मिन् पदे लकारः अस्ति–

(अ) लोट्लकारः (ब) लृट्लकारः

(स) लट्लकारः (द) लङ्लकारः।

(ग) "हसामि" इत्यस्मिन् पदे पुरुषः अस्ति–

(अ) प्रथमपुरुषः (ब) मध्यमपुरुषः

(स) उत्तमपुरुषः।

(घ) "घ्नन्ति" इत्यस्मिन् पदे वचनम् अस्ति–

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम्।

http://www.a2zSubjects.com

http://www.a2zSubjects.com

(ङ) "त्वं कदा गृहम् आगमिष्यसि" अस्मिन् वाक्ये अव्ययम् अस्ति–
(अ) गृहम् (ब) त्वं
(स) आगमिष्यसि (द) कदा।

उत्तर–(क) (अ), (ख) (अ), (ग) (स), (घ) (स), (ङ) (द)।

प्रश्न ४. (क) "क्तवतु" प्रत्ययस्योदाहरणम् अस्ति– १ × ५ = ५
(अ) त्यक्तवान् (ब) त्यजन्
(स) त्यक्तव्यम् (द) त्यक्त:।

(ख) "इतिहास + ठक्" इत्यस्य पदम् भविष्यति–
(अ) एतिहासिक (ब) ऐतिहासिक
(स) इतिहासिक (द) ईतिहासिक।

(ग) "याचमान:" इत्यस्मिन् पदे प्रत्यय: अस्ति–
(अ) तुमुन (ब) शतृ
(स) क्त्वा (द) शानच्।

(घ) "कोकिला" इत्यस्मिन् पदे प्रत्यय अस्ति–
(अ) आप् (ब) जाप्
(स) टाप् (द) ज्ञाप्।

(ङ) परोपदेशवेलायां शिष्टा: सर्वे ....... वै।
(अ) भवति (ब) हसन्ति
(स) हसति (द) भवन्ति।

उत्तर–(क) (अ), (ख) (ब), (ग) (द), (घ) (स), (ङ) (द)।

प्रश्न ५. प्रदत्तै: शब्दै: रिक्त-स्थानपूर्ति कुरुत– १ × ५ = ५
(*अनिलं, नावेक्षन्ते, बहव:, विवृणुयात्, समय:, सूर्यदेव:*)
(क) गुरुकुले ....... शिष्या आसन्।
(ख) न गुह्यं .......।
(ग) अन्येषां वस्तूनाम् अपेक्षया ....... अधिक: महत्वपूर्ण वर्तते।
(घ) वायु ....... ददाति।
(ङ) सन्त: परार्थं कुर्वाणा ....... प्रतिक्रियाम्।

उत्तर–(क) बहव:, (ख) विवृणुयात्, (ग) समय:, (घ) अनिलं, (ङ) नावेक्षन्ते।

प्रश्न ६. अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकपदेन लिखत– १ × ४ = ४
(क) घटोत्कच कया आज्ञप्त:?
(ख) "बुन्देलकेसरी" इति नाम्ना क: प्रसिद्ध:?
(ग) रघु: कस्मात् धनं प्राप्तुम् इष्टवान्?
(घ) महर्षि: कस्य स्थापनां कृतवान्?
(ङ) भारतीयैकता साधकं किम्?
(च) दरिद्रता कया विराजते?

उत्तर–(क) जनन्या, (ख) छत्रसाल:, (ग) कुबेरात्, (घ) आर्यसमाजस्य, (ङ) संस्कृतम्, (च) धीरतया।

प्रश्न ७. अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत– २ × ३ = ६
(क) वर्षाकाले धरणी कै: वितृप्ता भवति?
(ख) क: जीवन्नपि मृत: एव?
(ग) भगीरथ: कान् स्वर्गं नेतुं निश्चितवान्?
(घ) वरतन्तु: कौत्सं कियत् धनं याचितवान्?
(ङ) विदिशानगरी कस्मिन् प्रदेशे स्थिता विद्यते?

प्रश्न ८. अधोलिखितेषु द्वयो: शब्दयो: शब्द-रूपाणि त्रिषु वचनेषु लिखत– २
(क) "साधु" – तृतीयाविभक्ति:

http://www.a2zSubjects.com

http://www.a2zSubjects.com

(ख) "पितृ" — द्वितीयाविभक्तिः

(ग) "अस्मद्" — सप्तमीविभक्तिः

उत्तर— (क) साधुना साधुभ्याम् साधुभिः।

(ख) पितरम् पितरौ पितृन्।

(ग) मयि आवयोः अस्मासु।

प्रश्न ९. "मया" *अथवा* "कवीनाम्" इति पदस्य विभक्तिं वचनं च लिखत। २

उत्तर— मया — तृतीया विभक्तिः एकवचनं च।

कवीनाम् — षष्ठी विभक्तिः बहुवचनं च।

**प्रश्न १०. अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत—**

५ + ५ = १०

(क) काकस्य रटनं श्रुत्वा वृक्षस्य समीपे चरन्तः वृक्षाग्रे डयमानाः वृक्षस्य कोटरेषु निवसन्तः च सर्वे प्राणिनः पशवः पक्षिणः सर्पाश्च समायाताः। तेषां मध्ये प्रथमं सर्पः फटाटोप कुर्वन् न्यगदत "पितृपितामहानां कालादपि अहम् अत्रैव निवसामि अतोऽयं वृक्षः मदीय एव" इति। ततः शाखातः शाखान्तरं चक्रम्य एकः कीटः प्रत्यवदत् "मदीयैः अर्भकैः संवर्द्धन् अहं बहुवर्षेभ्यः अत्रैव उषितवानस्मि। अतोऽयं वृक्ष ममैव" इति।

प्रश्नाः— (i) काकस्य किं श्रुत्वा सर्वे प्राणिनः समायाता ?

(ii) सर्पः किं कुर्वन् न्यगदत्?

(iii) शाखातः शाखान्तरं चक्रम्य कः प्रत्यवदत् ?

(iv) "अतोऽयं वृक्षः ममैव इति" कः अवदत ?

(v) 'श्रुत्वा' इत्यस्य पदस्य प्रकृतिप्रत्ययञ्च पृथक्कुरुत।

(ख) भारते वैदिककाले उपनिषत्काले च नारी शिक्षिता आसीत्। सा न केवलम् अध्ययनम् अपितु सूक्तरचनाः अपि करोति स्म। वैदिककाले अपाला, घोषा, विश्ववारा, मैत्रेयी एतादृश्यः ब्रह्मवादिन्यः आसन्। उपनिषत्काले ता जीवनविषयकं जगद्विष्यकञ्च ज्ञानम् अधिगन्तुम् इच्छन्ति स्म। उपनिषत्काले वेदाध्ययनस्य कृते तासाम् उपनयनसंस्कारः अपि क्रियते स्म।

प्रश्नाः— (i) उपनिषत्काले नारी किं किं करोति स्म ?

(ii) वैदिककाले काः ब्रह्मवादिन्यः आसन् ?

(iii) उपनिषत्काले ताः किं इच्छन्ति स्म ?

(iv) तासां कः संस्कारः अपि क्रियते स्मं ?

(v) 'ताः' इत्यस्य पदस्य विभक्तिं वचनं च लिखत।

(ग) जनाः द्विधा समयस्य दुरुपयोगं कुर्वन्ति—व्यर्थयापनेन अकार्यकरणेन च। अनेके जनाः कार्यसम्पादने समर्था अपि निरर्थकं समयं यापयन्ति। इतो भ्रमन्ति ततो भ्रमन्ति अप्रयोजनं गृहे गृहे अटन्ति। न ते स्वार्थाय एव किञ्चित् कार्यं कुर्वन्ति न वा परार्थाय एव। देवदुर्लभमिदं मानवशरीरं लब्ध्वापि ये न अध्ययनं कुर्वन्ति न धर्मम् आचरन्ति न धनम् उपार्जयन्ति न वा मुक्तये प्रयासं कुर्वन्ति तेषां जन्म निरर्थकं भवति तथा इयं कर्मभूमिः एतादृशानां निष्क्रियाणां भारं वोढुं नेच्छति।

प्रश्नाः— (i) जनाः समयस्य दुरुपयोगं कथं कुर्वन्ति ?

(ii) अनेके जनाः कस्मिन् समर्था अपि निरर्थकं समयं यापयन्ति ?

(iii) मानवशरीरं कीदृशं अस्ति ?

(iv) इयं कर्मभूमिः केषां भारं वोढुं न इच्छति ?

(v) 'स्वार्थाय' इति पदस्य विपरीतार्थकः पदः लिखत।

http://www.a2zSubjects.com

http://www.a2zSubjects.com http://www.a2zSubjects.com

http://www.a2zSubjects.com

प्रश्न ११. अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत—

५ + ५ = १०

(क) *मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेत्।*
*मन्त्रेण रक्षयेद् गूढं कार्ये चाऽपि नियोजयेत्॥*

प्रश्नाः— (i) कार्यं कया चिन्तितं ?
(ii) वाचा किं न प्रकाशयेत् ?
(iii) गूढं केन रक्षयेत् ?
(iv) कार्ये किं नियोजयेत् ?
(v) 'रक्षयेत्' इति पदस्य धातुं लकारं पुरुषं च लिखत।

(ख) *दानेन भूतानि वशीभवन्ति*
*दानेन वैराण्यपि यान्ति नाशम्।*
*परोऽपि बन्धुत्वमुपैति दानै—*
*दानं हि सर्वव्यसनानि हन्ति॥*

प्रश्नाः— (i) भूतानि केन वशीभवन्ति ?
(ii) दानेन कानि नाशम् यान्ति ?
(iii) दानैः कः बन्धुत्वमुपैति ?
(iv) दानं कानि हन्ति ?
(v) 'परोऽपि' इति पदस्य सन्धिविच्छेदं कृत्वा नाम लिखत।

(ग) *युवान एष वः परीक्षणस्य काल आगतः*
*हिमालयस्य रक्षणे समुद्यताः स्थ सर्वतः।*
*अयं सखा पुरातनोऽस्य भारतस्य विद्यते*
*स्वकर्मणि प्रवर्तितुं कदापि नैव खिद्यते॥*

प्रश्नाः— (i) युवान एषः वः कस्य कालः आगतः ?
(ii) कस्य रक्षणे समुद्यताः स्थ सर्वतः ?
(iii) अयं पुरातनोऽस्य भारतस्य कः विद्यते ?
(iv) कस्मिन् प्रवर्तितुं कदापि नैव खिद्यते ?
(v) 'कदापि' इत्यस्य पदस्य सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत।

प्रश्न १२. युग्ममेलनं कुरुत— ४

| 'अ' | 'आ' |
|---|---|
| (क) यूथाद् भ्रष्टः दासेरकः | (i) आरोग्यशास्त्रम् |
| (ख) कुबेरः | (ii) नदन्ति |
| (ग) वैद्यकशास्त्रम् | (iii) धनदेवः |
| (घ) मत्तगजाः | (iv) मन्दमतिः |
| | (v) खगोलशास्त्रम् |

उत्तर—(क) → (iv), (ख) → (iii), (ग) → (i), (घ) → (ii)।

प्रश्न १३. शुद्धवाक्यानां समक्षं "आम" अशुद्धवाक्यानां समक्षं "न" इति लिखत— ४

(क) रामदेवः प्रातः स्मरणीयम् आसीत्।
(ख) कदन्नता उष्णतया न विराजते।
(ग) प्रवासिनः नराः स्वदेशान् यान्ति।
(घ) शुद्धोदनः शाक्यवंशीय न आसीत्।

उत्तर—(क) आम्, (ख) न, (ग) आम्, (घ) न।

http://www.a2zSubjects.com

http://www.a2zSubjects.com http://www.a2zSubjects.com

http://www.a2zSubjects.com

प्रश्न १४. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत। ४

प्रश्न १५. स्वप्राचार्य कृते दिवसद्वयस्य अवकाशार्थम् प्रार्थनापत्रं संस्कृतभाषायां लिखत। ४

*अथवा*

स्वमित्रस्य कृते स्वअध्ययनस्य वर्णयन् संस्कृतभाषायाम् एकं पत्रं लिखत।

प्रश्न १६. अधोलिखितेषु "पञ्च" अशुद्धकारकवाक्यानां शुद्धिः करणीया– ५

(क) ईश्वरं नमः।

(ख) सैनिकः अश्वेन पतति।

(ग) माता बालकं दुग्धं ददाति।

(घ) गणेशः मोदकं रोचते।

(ङ) बालकः मित्रं सह गच्छति।

(च) भवान् कुत्र पश्यसि।

प्रश्न १७. अधोलिखितवाक्यानां कथानुसारेण क्रमसंयोजन कुरुत– ५

(क) उष्ट्रः यूथाद् भ्रष्टोऽभवत्।

(ख) सिंहेन उष्ट्रः मारितः।

(ग) रथकारः गूर्जरदेशं गत्वोष्ट्रीं गृहीत्वा स्वगृहमागतः।

(घ) तेन प्रचुरा उष्ट्राः करभाश्च सम्मिलिताः।

(ङ) वने प्रसववेदनया पीड्यमाना उष्ट्रीम् अपश्यत्।

उत्तर– (ङ) → (ग) → (घ) → (क) → (ख)।

प्रश्न १८. अधोलिखितम् अपठितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– ५

संसारे अनेकषां दुःखानां मूलकारणम् अज्ञानम्। अज्ञानात् एव समाजे नानाविकाराणां जन्म भवति। हिंसाभ्रष्टाचारादयः ये उपद्रवाः अस्मान् पीडयन्ति, तेषां मूले अशिक्षा एव वर्तते। वयं शिक्षायाः प्रकाशेन अन्धकारं हर्तुं सज्जा भवेम।

प्रश्नाः– (क) अस्य गद्यांशस्य शीर्षक लिखत।

(ख) दुःखानां मूलकारणं किम् ?

(ग) समाजे अनेके विकाराः कथं जायन्ते ?

(घ) के उपद्रवाः अस्मान् पीडयन्ति ?

(ङ) 'अज्ञानात्' शब्दे का विभक्तिः ?

प्रश्न १९. अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायाम् निबन्धं लिखत– १०

(क) संस्कृतभाषायाः महत्वम्,

(ख) छात्रजीवनम्,

(ग) सदाचारः,

(घ) महाकवि कालिदासः।

http://www.a2zSubjects.com

http://www.a2zSubjects.com http://www.a2zSubjects.com